मास्थितिः॥स्वाधिष्ठाने चदेवेशि जगद्योनिः पितामहः॥४६॥स्वंपूजये
त्स्वशक्त्या चनिर्गुणो सर्वभावनं॥कल्लोलसागराः सर्वे सप्तद्वीपा वसुंधरा
॥४७॥एकविंशच्च ब्रह्मांडानाम्निमत्तेव संति च॥नाभौ पूज्यंच यत्नेन दे
वदेवं चतुर्भुजं॥४८॥इंद्रादि देवताः सर्वा स्कुष्टा भवंति योगिनः॥हृदये प्रा
णमीशानं परमात्मा सदाशिवः॥४९॥पंचवक्त्रं महादेवमुमया सहितं शि
वे॥कंठे च मातरः सर्वा जीवविद्यासमन्विताः॥५०॥त्रिलोकपीठमास्थाय
योजयेत्पुरुषोत्तमं॥सप्तकोटि महामंत्रा रं तमूले चतालुके॥५१॥जिह्वाग्रे
वेखरी प्रोक्ता चिबुके वणी माश्रिताः॥चंद्रसूर्यद्वयोर्नेत्रे करी च अधिदेवता॥५२॥
कवोर्मध्ये महाप्राणं नैरविंदु समर्चयेत्॥मंडले न्यस्यते देवि ब्रह्मा विष्णुर्वयपुनः॥५३॥

© Dharmartha Trust J&K. Digitized by eGangotri

गी पंक्तिभिर्वेसुतेतन्त्रचलः षष्टिगेहेषु च॥ चलः षष्टिश्च मध्ये च देवी चैवैकसंस्थिताः

५ ॥५४॥ प्रकृतिश्च स्वशक्तिश्च शिव शक्त्या समन्विताः॥ नाहं च चर्चिता वस्मान वै

वचोर्चितो हरिः॥५५॥ मूलाधार कृपदद्वं हूं मस्तके न्दु विराजिता॥ शांभवस्थानयो

र्मध्ये तस्मै श्रीगुरुपादुका॥५६॥ एवं प्रपूज्य देवेशि यदिच्छेदिष्टकाम्यया॥

अन्यथा निष्फलं याति गुरुपादार्चनं विना॥५७॥ धर्मार्थकाममोक्षाणां अधि

पंच गुरुः स्मृतः॥ तस्य संतुष्टिमात्रेण सर्वकार्यार्थसिद्धिदः॥५८॥ गुरुमूलाः

गुरु क्रियाः सर्वा भुक्ति फलप्रदाः॥ तस्मात्सेव्यो गुरुर्नित्यं युक्तायेषु फलप्रदाः॥५९॥

गुरुनिष्ठां च पूजां च कर्तव्या च दिने दिने॥ परां गतिमवाप्नोति यत्स्कैरपि दुर्लभं॥ ५

६० निमिषं निमिषार्धं वा नन्दं मानसं स्मरेत्॥ स एव पतितो ज्ञेयः सत्यं सत्यं वद

ाम्यहं॥६१॥ नित्यज्ञानप्रदीपाय निर्वैर स्वरूपिणे॥ निर्विकल्पाय शांताय

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मै श्रीगुरवे नमः ॥६२॥ स्वराड्हर स्वरूपाय शांताय गुरुमूर्तये ॥ आनंदैकरसानंदे
तस्मै श्रीगुरवे नमः ॥६३॥ बोधाय बोधरूपाय शाश्वमायाधराय च ॥ नादबिंदुस्वरू
पाय तस्मै श्रीगुरवे नमः ॥६४॥ इच्छाज्ञानक्रियाशक्ति गुरुदेहे वसंति च ॥ इति र
हस्यं महादेवि विघ्नमुक्तं ग्रंथकोटिभिः ॥६५॥ अतिगोप्यं रहस्यं च न देयं यस्य कस्य
चित ॥ गुरुभक्ताय दातव्यं अन्यथा न कदाचन ॥६६॥ शठाय नो च न दातव्यं यद्यपि व
स्नसदृशः ॥ श्रीदेव्युवाच ॥ अहो नाथ परंज्योति रूपपापानवतारक ॥६७॥ यज्ञोप्य
मस्ति लोके च तत्सर्वं चैव वद स्व मे ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि तव स्नेहा
त्प्रकीर्तितं ॥६८॥ गोपनीयं प्रयत्नेन पिंडस्य जीवनं यथा ॥ गुरोर्नामगुणं तस्य सर्वे
देवाश्च वल्लभाः ॥६९॥ मंत्रवीर्यं च विज्ञेयं सत्यं सत्यं वदाम्यहं ॥ इच्छाज्ञानक्रियाश
क्तिर्येस्य वाक्यात्समुद्भवः ॥७०॥ स्वयमेव महादेवो गुरुरित्यक्षरद्वयं ॥ हेतानंदस

© Dharmartha Trust J&K. Digitized by eGangotri

पद्रूपायै तत्ज्ञानस्वरूपिणे ॥७१॥ द्वैताद्वैत महादेव शांतं गुरु स्मृतं ये ॥ अमूर्तिं च नि
राकारं निर्विकल्पं निरंजनं ॥७२॥ अतीव विदि नियोगे सुशांताय गुरवे नमः ॥ रुकु
पीठं जगत्सर्वं मेरुमेकं मुद्रा च खेचरी ॥७३॥ [illegible] व महामंत्रो गुरुरित्यक्षरद्वयं ॥
सर्वं मंत्रस्वरूपाय निर्गुणाय गुणात्मने ॥७४॥ स्वयाद्रूमखिलं ध्यायेत्तस्मै श्री
गुरवे नमः ॥ शब्दब्रह्मस्वरूपाय निःसंगाय गुणात्मने ॥७५॥ आत्मानमखि
लं ध्यायेत्तस्मै श्रीगुरवे नमः ॥ सच्चिदानंदरूपाय हरये परमात्मने ॥७६॥ वारंवा
रं किमुक्तेन ग्रंथविस्तरपूर्वकं ॥ रहस्यं च माहागोप्यं जल्पाचास्य सुरवीत्त्वेव त्
॥७७॥ इति श्रीविश्वसारोद्धारे उमामहेश्वरसंवादे गुरुरहस्ये गुपूजाविधानं
नाम स्तोत्रं समाप्तं ॥ शुभमस्तु ॥ १ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri